# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (१४)

१७.१०.२०११

# धकारान्ताः पुंलिङ्गाः

- धकारान्तः पुंलिङ्गः ‘बुध्’ शब्दः ।
- ‘बुध् अवगमने’ धातोः क्विप्-प्रत्ययान्तः ।

- भष्भावः, जश्त्व-चर्त्वे ।
- बुध्  (सुँ) स्
- बुध्		(‘हल्ङ्याब्भ्यो दीर्घात्...’ - ६.१.६८)
- भुध्		(‘एकाचो बशो भष्...’ - ८.२.३७)
- भुद्		(‘झलां जशोऽन्ते’ - ८.२.३९)
- भुत्		(‘वाऽवसाने’ - ८.४.५६)

- बुधौ, बुधः ।
- बुधा, भुद्भ्याम् ।
- पदान्तत्वाद् भष्भावः, जश्त्वम् ।

- भुत्सु ।
- पदान्तत्वाद् भष्भावः, जश्त्वम्, चर्त्वम् ।

# जकारान्ताः पुंलिङ्गाः

- जकारान्तः पुंलिङ्गः ‘युज्’ शब्दः ।
- ‘युजिर् योगे’ इति धातुः ।

# ३७३. ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च (३.२.५९)

- पदद्वयम् । ऋत्विग्-दधृक्-स्रग्-दिग्-उष्णिग्-अञ्चु-युजि-क्रुञ्चां, च ।
- 'धातोः' (३.१.९१) इति अधिक्रियते । 'स्पृशोऽनुदके क्विन्' (३.२.५८) इत्यतः 'क्विन्' इति अनुवर्तते ।
- एभ्यः क्विन् स्यात् ।
- अलाक्षणिकमपि किञ्चित्कार्यं निपातनाल्लभ्यते ।
- सिद्धस्वरूपस्य निर्देशो निपातनम् ।
- लक्षणानि सूत्राणि, तद्विहितं कार्यं लाक्षणिकम् ।

- निरुपपदाद् युजेः क्विन् ।
- कनवितौ ।
- युज् क्विन्
- युज् व् ('लशक्वतद्धिते' - १.३.८, 'हलन्त्यम्' - १.३.३, 'तस्य लोपः' - १.३.९)

# ३७४. कृदतिङ् (३.१.९३)

- पदद्वयम् । कृत्, अतिङ् ।
- संज्ञासूत्रम् ।
- 'प्रत्ययः' (३.१.१) इति, 'धातोः' (३.१.९१) इति च अधिक्रियते ।
- सन्निहिते धात्वधिकारे तिङ्-भिन्नः प्रत्ययः कृत्-संज्ञः स्यात् ।
- इति क्विनः कृत्-संज्ञा ।

# ३७५. वेरपृक्तस्य (३.१.६७)

- पदद्वयम् । वेः, अपृक्तस्य ।
- 'लोपो व्योर्वलि' (६.१.६६) इत्यतः 'लोपः' इति अनुवर्तते ।
- अपृक्तस्य वस्य लोपः स्यात् ।
- 'अपृक्त एकाल् प्रत्ययः' (१.२.४१)

- युज्  व्
- युज्            ('वेरपृक्तस्य' - ६.१.६७ - इति वलोपः)
- 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकत्वात् स्वादयः ।

# ३७६. युजेरसमासे (७.१.७१)

- पदद्वयम् । युजेः, असमासे ।
- 'इदितो नुम् धातोः' (७.१.५८) इत्यतः 'नुम्' इति, 'उगिदचां सर्वनामस्थानेऽधातोः' (७.१.७०) इत्यतः 'सर्वनामस्थाने' इति च अनुवर्तते ।
- युजेः सर्वनामस्थाने नुम् स्याद् असमासे ।
- सुलोपः, संयोगान्तलोपः ।
- युज्  (सुँ) स्
- यु न् ज्   स्   ('युजेरसमासे' - ७.१.७१ - इति नुम्)
- यु न् ज्   ('हल्ङ्याब्भ्यः...' - ६.१.६८)
- युन्   ('संयोगान्तस्य लोपः' - ८.२.२३)

# ३७७. क्विन्प्रत्ययस्य कुः (८.२.६२)

- पदद्वयम् । क्विन्-प्रत्ययस्य, कुः ।
- ‘पदस्य’ (८.१.१६) इति अधिक्रियते, ‘झलां जशोऽन्ते’ (८.२.३९) इत्यतः ‘अन्ते’ इति अनुवर्तते ।
- क्विन् प्रत्ययः यस्मात् तस्य कवर्गः अन्तादेशः स्यात् पदान्ते ।
- नस्य कुत्वेन अनुनासिको ङकारः ।
- युङ् ।

- ‘नश्चापदान्तस्य..’ इति नुमोऽनुस्वारः, परसवर्णः, तस्य असिद्धत्वात् ‘चोः कुः’ इति कुत्वं न, युञ्जौ ।

- युज् औ
- युन् ज् औ (‘युजेरसमासे’ - ७.१.७१ - इति नुमागमः)
- युं ज् औ (‘नश्चापदान्तस्य झलि’ - ८.३.२४)
- युञ्जौ (‘अनुस्वारस्य ययि परसवर्णः’ - ८.४.५८)
  - ‘चोः कुः’ (८.२.३०) - चवर्गस्य कवर्गः स्यात् झलि पदान्ते च । इति प्राप्ते, परसवर्णस्य असिद्धत्वात् न भवति ।

- युञ्जः ।
- युञ्जम्, युञ्जौ ।
- युजः ।
- शसि सर्वनामस्थानत्वाभावात् नुमागमो न ।
- युजा, युग्भ्याम् इत्यादि ।

- असमासे किम् -
- जकारान्तः पुंलिङ्गः 'सुयुज्' शब्दः ।
- अत्र नुमागमो न ।

# ३७८. चोः कुः (८.२.३०)

- पदद्वयम् । चोः, कुः ।
- 'पदस्य' (८.१.१६) इति अधिक्रियते । 'झलो झलि' (८.२.२६) इत्यतः 'झलि' इति, 'स्कोः संयोगाद्योरन्ते च' (८.२.२९) इत्यतः 'अन्ते' इति च अनुवर्तते ।
- चवर्गस्य कवर्गः स्यात् झलि पदान्ते च ।
- इति कुत्वम्, 'क्विन्प्रत्ययस्य...' (८.२.६२) इति कुत्वस्य असिद्धत्वात् ।
- सुयुज् (सुँ) स्
- सुयुज् ('हल्ङ्याभ्यः...' - ६.१.६८)
- सुयुग् ('चोः कुः' - ८.२.३०)
- सुयुक् ('वावसाने' - ८.४.५६)

- सुयुजौ, सुयुजः ।

- ‘युजेः’ इति धातुपाठपठित-इकारविशिष्टस्य अनुकरणम्, न तु इका निर्देशः ।
- ‘इक्श्तिपौ धातुनिर्देशे’ ।
- गमिः = गम्-धातुः, वदिः = वद्-धातुः ।
- भवतिः = भू-धातुः, अस्तिः = अस्-धातुः ।
- अत्र तु ‘युजि’ इति यदि इका निर्देशः, तर्हि केवलम् ’युज्’ धातुः इति ज्ञायते, किमनुबन्धकः इति न ज्ञायते ।
- अत उच्यते, धातुपाठे यः धातुः इकारसहितः तस्य अयं निर्देशः, न तु इका ।

- तेनेह न - युज्यते समाधत्ते इति युक् ।
- 'युज समाधौ' दैवादिक आत्मनेपदी ।
- 'ऋत्विग्दधृक्...' इति सूत्रे, 'युजेरसमासे' इति सूत्रे च इकारानुबन्धस्यैव युज्-धातोः (युजिर् योगे) ग्रहणम्, न तु अस्य ।
- तेन अत्र क्विन्प्रत्ययोऽपि न, नुमागमोऽपि न ।
- युक्, युजौ, युजः इत्यादि ।